कालीकर्पूरस्तोत्रम् सटी
कम्
॥५७

वाकुचितोला·गेरु मासे· इनदोनोकोपीसना पारीमिके श्वेत कुष्टोंके दागोंपर लेपन करना और तोला भर वाकुचि का लोनची मा·गेरु मा· इनकोगोमूत्र मे पीस करके एकरतीकी गोली करसी निमक निरवारागा॥ येहगोलि कामदरा कर और लेपन करे· श्री

कर्पूरारव्य कालीस्तोत्रं सटीकं श्लो॰ २६५

नं ५७

॥ ॐ नमः कालिकायै ॥ कर्पूर मित्यस्य मध्यस्य व्यंजन वर्णे रेफ युक्त वकारः अन्त्य पदेनानुस्वारः स्वर पदेनाकार इत्यत्र मकार श्चैतद्रहितम् ॥ पुनः किंभूतैः सेन्दु वामाक्षि युक्तम् ॥ इंदुपदेन विंदुः वामाक्षि दीर्घ ईकारस्तद्युक्तम् ॥ तथाच क्रीमिति वीजम् ॥ हे मातस्तवैतद्बीजम् ॥ त्रिः कृत्वा ये जपन्ति तेषां मुखकुहरात्स्वच्छंदं पद्यानि चोद्गच्छन्त्येव ॥ हे ध्वान्तधाराधर रुचिरुचिरे निविड मेघस्येव रुचिः तस्मादपि रुचिरे मनोज्ञे अति शय कृष्णवर्णे इत्यर्थः ॥ तेषां कथंभूतानां । सर्वसिद्धिं गतानां प्राप्तानाम् अणिमादि अष्टसिद्धि संयुतानामित्यर्थः तथा च अनंतैश्वर्ये ॥ अपूर्विका कवित्व शक्तिर्भवति ॥ हे त्रिपुरहरवधु ॥ त्रिपुरहरस्य श्रीसदाशिवस्य वधुः त्रिपुरहरवधु तत्संबोधनम् ॥ हे त्रिपुरहरवधु ॥ १ ॥ मूल ॥ कर्पूरं मध्यमान्त्यं स्वरपदरहितं सेन्दु वामाक्षि युक्तं वीजं ते मातरेतत्त्रिपुरहरवधू त्रिः कृतं ये जपन्ति तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसन्त्येव वाचः स्वच्छंदं ध्वान्तधाराधररुचि रुचिरे सर्वसिद्धिं गतानाम् ॥ १ ॥ टीका ॥ ईशान इति ॥ ईशानो हकारः इंदुर्विन्दुः वामश्रवणो दीर्घ ऊकारः तत्परिगतस्तद्युक्तः तथा च हूमिति वीजम् ॥ एतद्द्वंद्वं मन्दचेताः जनो वारमेकं कदाचित् यदि जपति तदा वाचामधीशं वृहस्पतिं जित्वा धनदं कुबेरं मतिं पि जित्वा ॥ अंबुजाक्षीणां कमललोचनानां स्त्रीणां वृंदं समूहं देमोहयन्न्सन् प्रभवति ॥ हे चन्द्रार्द्ध चूडे इति संबोधनम् ॥ घोरवाणावतंसे ऽत्यंत भयानके वाणे अवतंसे तस्यासातत्संबोधने ॥ २ ॥ मूल ॥ ईशानः सेन्दु वामश्रवण परिगतो वीजमन्यन्महेशि द्वंद्वं ते मन्दचेता यदि जपति जनो वारमेकं कदाचित् ॥ जित्वा वाचामधीशं धनदमपि चिरं मोहयन्नंबुजाक्षी वृंदं चंद्रार्द्ध चूडे प्रभवति स महाघोरवाणावतंसे ॥ २ ॥ टीका ॥ ईश इति ॥ ईशो हकारः वैश्वानरस्यो रेफस्य पुनः किंभूतः शशधर विलसद्धामनेत्रेण युक्तः शशधरो विन्दुः तेन विलसद्धामनेत्रं दीर्घ ईकारस्तद्युक्तः ॥ तथा च ॥ ह्रीमिति वीजम् ॥ हे कालिके ॥ ते तवान्यद्बीजं द्वंद्वं द्विवारं ये जपन्ति ते देष्टारं निहन्ति द्वेष्टारं शत्रुमिति ॥ एवं ते जना स्त्रिभुवनं त्रिलोकं वश्यभावं नयन्ति ॥ हे विगलित चिकुरे विगलित केशपाशे इति सम्बोधनम् ॥ कालिके ति छान्दसत्वादिकार लोपः स्रक्कद्वंदास्रग्धाराद्वय धरवदने सृक्कद्वंद्वास्र ह्रौदने ॥ अधोयेते वदने यस्यास्ते तस्यापि संबोधनम् ॥ पुनः कालिकेति सम्बोधनम् एकेव तृर्हिं र्षसूचकम् ॥ ३ ॥ मूल ॥ ऊर्द्धे वामे कृपाणं करकमलतले छिन्नमुंडं तथाधः सव्ये भीतिं वरं च त्रिजगदघहरे दक्षिणे कालिके च ॥ जप्त्वैतन्नाम वर्णं तव मनु विभवं भावयन्त्येव मंत्र तेषामष्टौ करस्थाः प्रकटितवदने सिद्धयस्त्र्यंवकस्य ॥ ४ ॥ टीका ॥ ऊर्द्ध इति ॥ हे त्रिजगदघहरे त्रिलोकपापहरे ॥ तव ऊर्द्धे वामे वामहस्ते कृपाणं खड्गं तथा वामाधः करतलकमले छिन्नमुंडं ॥ सव्ये दक्षहस्ते द्वये अभयं वरं च एतदवज्ञानपूर्वकं दक्षिणे कालिके इति

मनायासेन गद्यानि = ३

१

शि =

३ =

५॰ ईशो वैश्वानरस्यः शशधर विलसद्धामनेत्रेण युक्तो वीजं ते द्वंद्वमन्यद्विगलित चिकुरे कालिके ये जपन्ति ॥ द्वेष्टारं घ्नन्ति ते च त्रिभुवनमपि ते वश्यभावं नयन्ति ॥ सृक्कद्वंद्वास्रग्धाराद्वयधर वदने दक्षिणे कालिके च ॥ ३ ॥ ५॰ = ४

शि॰ वः १

॥ क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दा॰ मं॰ स्वाहा ॥ ५ ॥

॥ वर्गाद्यमिति ॥ वर्गाद्यं ककारः वह्निसंस्थं रेफसंस्थं विधुरनुस्वारः रतिर्दीर्घईकारस्ताभ्यां ललितं युक्तं तत्त्रयं क्रीं मिति बीजत्रयम् ॥ कूर्चयुग्मं हूंकारद्व
यम् ॥ पश्चात् ह्रींकारद्वयं तदधः तदन्ते ठद्वयं स्वाहा ॥ हे मातस्ते तव स्वरूपं त्वदीयाकारं ॥ भावयन्तो ये जना जपन्ति ते जना लक्ष्मीलास्यलीला
कमलदलदृशो भवन्ति ॥ लक्ष्म्यास्य क्रीडास्थानं यत्कमलदलं कमलपत्रं तस्य इव चक्षुर्येषां ते तथा तेषां पुरुषाणां करात्क्रमागेण त्वेषां सुपुरुषाणां
संपत्तिर्भवतीति फलितार्थः पुनः किंभूताः कामरूपाः सर्वकर्मसु निपुणतरा इत्यर्थः ॥ स्मितमुखि ईषद्धास्यमुखि ॥ स्मरहरमहिले ॥ स
दाशिवपत्नीति संबोधनम् ॥ ५ ॥ मूल ॥ वर्गाद्यं वह्निसंस्थं विधुरतिललितं तत्त्रयं कूर्चयुग्मं ॥ लज्जाद्वंद्वं च पश्चात् स्मितमुखि तदधष्ठद्वयं यो
जपित्वा त्वां मातर्ये जपन्ति स्मरहरमहिले भावयन्तः स्वरूपं ते लक्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवन्ति ॥ ५ ॥ टीका ॥ प्रत्येकं
वेति ॥ हे देवि प्रत्येकं सप्तबीजान्यतमं त्रयं वा निजबीजत्रयं ॥ ह्रीं द्वयं कूर्चबीजद्वयम् ॥ सकलमपि वा दक्षिणे कालिके इति त्वन्नाम्नायो जपित्वा ॥ ये जनाः
त्वदीयाकारं भावयन्तः सदा जपन्ति ॥ तेषां नेत्रारविंदे कमला लक्ष्मीर्विहरति निवसति ॥ वक्त्रशुभ्रांशुबिंबे मुखचन्द्रे सरस्वती विहरति निव
सति ॥ केदेवि दीप्तक्रीडायुक्ते ॥ हे मुंडस्रग्गतिशायलसत्कंठपीनस्तनाढ्ये ॥ इति सम्बोधनत्रयम् ॥ बीजं कथंभूतम् अत्यन्तगुह्यं प
रमश्रेष्ठं ॥ ६ ॥ मूलम् ॥ प्रत्येकं वा द्वयं वा त्रयमपि च परं बीजमत्यन्तगुह्यं त्वन्नाम्नायो जपित्वा सकलमपि सदा भावयन्तो जपन्ति ॥ तेषां
नेत्रारविंदे विहरति कमला वक्त्रशुभ्रांशुबिंबे वाग्देवी देवि मुंडस्रग्गतिपरिलसत्कंठपीनस्तनाढ्ये ॥ ६ ॥ टीका ॥ गतासूनामिति ॥ हे जन
नि त्वां ध्यायन् जडचेता अपि कविर्भवति त्वां किंभूतां गतासूनां बाहुप्रकरकनकांचीपरिलसन्नितम्बां पुनः किंभूतां दिग्वस्त्रां त्रिभुवनवि
धात्रीं त्रिनयनां श्मशानस्थे तल्पे शय्यायां शवहृदि महाकालसुरतप्रसक्तां ॥ महाकालेन संहरति क्रीडायुक्ताम् एवंभूतां ध्यायन्नित्यर्थः ॥ ७ ॥
मूल ॥ गतासूनां बाहुप्रकरकृतकांचीपरिलसन्नितंबां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनां ॥ श्मशानस्थे तल्पे शवहृदि महाकालसु
रतः ॥ प्रसक्तां त्वां ध्यायन् जननि जडचेता अपि कविः ॥ ७ ॥ टीका ॥ शिवाभिरिति ॥ हे देवि प्रकटितचितायां दहच्चितायां प्रविष्टां
त्वां हरवधूं ये सदा ध्यायन्ति तेषां क्वचिदपि न परिभवः ॥ किंभूतायां चितायां घोराभिः शिवाभिः संकीर्णायां प्रविष्टायाम् एवं शवमुंडा
स्थिनिकरैः समूहैः विशिष्टायाम् ॥ परमुत्कृष्टं यथास्यादिति क्रीडाविशेषणम् ॥ त्वां किंभूतां अतियुवतीं उपसुरते संयुक्तां
विपरीतरतासक्तामित्यर्थः ॥ ८ ॥ मूल ॥ शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः परं संकीर्णायां प्रकटितचितायां हर
वधूम् ॥ प्रविष्टां संतुष्टामुपरिसुरतेनातियुवतीं ॥ सदा त्वां ध्यायन्ति क्वचिदपि न तेषां परिभवः ॥ ८ ॥ टीका ॥ वदाम स्ते इति ॥ हे जन
नि तव परमं रूपं धाता ब्रह्मापि न वेत्ति ईशः श्रीशंकरः हरिर्नारायणोऽपि न वेत्ति ॥ उच्चैर्जडधियो सन्तमदमत्तयः वयं किं वदामः ॥ कथं

[illegible]

२

2

ततएतत्सुखरताजमपराधं भगवत्या त्वयात्तन्तव्यम् ॥ खलु निश्चयेन पशुपुरोषः पशुरोषः समुचितो न भवति ॥ अज्ञानिविषयेकोधोऽयु
क्तमित्यर्थः ॥ ९ ॥ मूल ॥ वदाम्यहे किंवा जननि वयमुच्चैर्जडधियो नधाता नापीशो हरिरपि नते ते विन्दुपरमम् ॥ तथापि त्वद्भक्तिर्मुखे
रयति चास्माकमसिते ॥ तदेतत्क्षंतव्यं न खलु पशुरोषः समुचितः ॥ ९ ॥ समंतादिति ॥ हे देवि नक्तं रात्रौ विवासाः सन् त्वां ध्यायन् तव मंत्रं
मंत्रं यदि जपति तदा समस्ताः सिद्धौघाः अणिमाद्यष्टसिद्धयः करांभोजे वश्या भवन्ति ॥ तस्य कथंभूतस्य द्रोणीतलविरहमानस्य राज्ञः
त्वां कथंभूतां चांचल्यरहितां विपरीतरतासक्तां विचिंत्य मंत्रं जपति इत्यर्थः ॥ १० ॥ मूल ॥ समंतादापीनस्तनजघनधृग्यौवनवति
रतासक्तो नक्तं यदि जपति भक्तस्तव मनुम् ॥ विवासास्त्वां ध्यायन् गलितचिकुरे तस्य वशगाः समस्ताः सिद्धौघा भुवि तव चिरं
जीवति कविः ॥ १० ॥ समास्वस्थी भूतां जपति विपरीते रतिविधौ विचिंत्य त्वां ध्यायन्नतिशयमहाकालसुरताम् ॥ तदा त
स्य द्रोणीतलविरहमाणस्य विदुषः करांभोजे वश्या हरवधू महासिद्धिनिवहाः ॥ ११ ॥ टीका ॥ प्रसूते इति ॥ हे जननि भवती संसारं
प्रसूते ऽतः कारणात्त्वां धाता ब्रह्मा जगत्सृजति अतस्त्रिभुवनपतिः श्रीपतिः समस्तं इत्यादि प्रलयसमये संहरति अतो महेशः
चकारः समुच्चयार्थः अहो आश्चर्यं त्वां प्राय्यः सकलमपि इंद्रादयोपि अपिशब्दवार्थे ॥ अत एव भवती किं स्तोभि वर्णया
मीत्यर्थः ॥ १२ ॥ मूल ॥ प्रसूते संसारं जननि भवती पालयति च ॥ समस्तं क्षित्यादि प्रलयसमये संहरति च ॥ अतस्त्वां धातापि त्रिभुव
नपतिः श्रीपतिरथो ॥ महेशोपि प्रायः सकलमपि किं स्तोमि भवतीम् ॥ १२ ॥ टीका ॥ अनेके इति ॥ हे मातः भवदधिकगीर्वाणनिव
हान् त्वदतिरिक्तदेवतासमूहान् अनेके सेवन्ते किमपि किंचिदपि परमं तत्वं न हि जानन्ति मूढा अतिदुर्बुद्धयः किंच हरिहरविरंच्या
दिविबुधैः समाराध्यां त्वामाद्यामाद्यप्रकृतिरूपामहं प्रपन्नोस्मि शरणागतोस्मि त्वां कथंभूतां स्वैरं स्वच्छन्दं यथास्यात्तथा रतिर
समहानंदनिरतां रतिक्रीडासक्ताम् ॥ १३ ॥ मूल ॥ अनेके सेवन्ते भवदधिकगीर्वाणनिवहान् ॥ विमूढास्ते मातः किमपि न हि जान
न्ति परमम् ॥ समाराध्यामाद्यां हरिहरविरंच्यादिविबुधैः ॥ प्रपन्नोस्मि स्वैरं रतिरसमहानंदनिरताम् ॥ १३ ॥ टीका ॥ धरित्री
ति ॥ कालि ॥ त्वं धरित्री पृथ्वी एवं कीलालं जलं शुचिरग्निः समीरो वायुः गगनमाकाशं कथंभूतां गिरिशरमणी शिवपत्नी एका
अद्वितीया एवं सकलं हे मातस्ते तव स्तुतिका अगतिक मातव करुणया तव प्रसन्ना भूया स्ततो भवं संसारमनु लक्षीकृत्य मम
जनुर्मम जन्म न भूयात् ॥ १४ ॥ मूल ॥ धरित्री कीलालं शुचिरपि समीरोपि गगनं त्वमेका कल्याणी गिरिशरमणी कालि सकलम् ॥

प्रीतिः कालिमातस्तव करुणा [illegible] ॥ मनुजत्वं ममास्तु नः ॥ ४ ॥ [illegible] ॥ श्रीः ॥

शिवः
२

॥टीका॥ श्मशानस्थः सुस्थो इति॥ हे महाकालि यः पुरुषः श्मशानस्थः सन् ईश्वरस्य त्वदेकं मनुं मन्त्रं जपन् ॥ त्वर्काणां सहस्रं कुसुमं
निजगलितवीर्येण स्वकीयशुक्रेण वेष्टितं कृत्वा ददाति स सर्वेरं मनायासेन धरित्रीपरिवृढो भवति राजा भवतीत्यर्थः॥ सकथंभूतः सुस्थः
एकचित्तः गलितचिकुरो विमुक्तकेशपाशः दिक्पटधरः वस्त्रशून्य इत्यर्थः पुनः कथंभूतः तवध्याननिरतः॥१५॥ मूल॥
श्मशानस्थः सुस्थो गलितचिकुरो दिक्पटधरः सहस्रं त्वर्काणां निजगलितवीर्येण कुसुमं॥ जपंस्त्वत्त्येकं मनुमपि तवध्याननिरतो महाका
लि स्वैरं स भवति धरित्रीपरिवृढः॥१५॥ टीका॥ गृहे इति॥ हे कालि यो जनः कुजदिने मंगलवारे समूलं कुसुमं मार्जन्यासह परिगलितं
वीजं स्वकीयशुक्रं गृहे स्वकीकृत्य चितायां मनुं मन्त्रमुच्चार्य प्रेम्णा भक्त्या सकृदेकवारं यदि वितरति ददाति तदा शतगजारूढो भवति क्षितिप
रिवृढो राजा भवति एवं सत्कविः वर कविश्रेष्ठो भवति॥ यद्वा चिकुरमधः कुंडलम्॥ सम्मार्जनी वेश्या तया परिगलितवीजं त
स्याः शोणितमित्यर्थः॥१६॥ मूल॥ गृहे सम्मार्जन्या परिगलितवीजं हि कुसुमं समूलं मध्याह्ने वितरति चितायां कुजदिने॥ समुच्चा
र्य प्रेम्णा मनुमपि सकृत्काली सततं गजारूढो जाति क्षितिपरिवृढः सत्कविवरः॥१६॥ टीका॥ सुपुष्पैरिति॥ सुपुष्पैराकीर्णं सं
युक्तं कुसुमधनुषो मन्दिरं स्त्रियाः स्थानविशेषं पुरः सम्मुखे ध्यायन् ध्यायन् यदि जपति तदा हो आश्चर्यं स गंधर्वश्रेणीपतिर्भवति क
वित्वामृतनदीनदीनः अमृतनदिना समुद्र इव पर्यन्ते मरणकाले परमपदलीनो भवति॥१७॥ मूल॥ सुपुष्पैराकीर्णं कुसुमधनुषो मं
दिरमहो पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव मनुम्॥ सगन्धर्वश्रेणीपतिरपि कवित्वामृतनदी नदीनः पर्यन्ते परमपदलीनः प्रभ
वति॥१७॥ त्रिपंचारे इति॥ हे जननि त्रिपंचारे पंचदशकोणके पीठे पंचदशकोणघटितयन्त्रे॥ शवशिवहृदि स्मेरवदनां त्वां यो जनो ध्या
येत् स स्मरहरः शिवः स्यात्॥ त्वां किंभूतां महाकालेनोच्चैर्मदनवशलावण्यनिरताम्॥ महाकालेन सह ताम्यंत क्रीडासक्तां जनः किंभूतः न
क्तं रात्रौ रतासक्तः रते प्रवृत्तः॥१८॥ मूल॥ त्रिपंचारे पीठे शवशिवहृदि स्मेरवदनां महाकालेनोच्चैर्मदनवशलावण्यनिरताम्॥
समासक्तो नक्तं स्वयमपि रतानन्दनिरतो जनो यो ध्यायेत्त्वां जननि किल स स्यात्स्मरहरः॥१८॥ टीका॥ सलोमास्थीति॥ असिते त
व पूजायां बलिं स्वैरं स्वच्छन्दं वितरतां मर्त्यवसतां नराणां प्रतिदिनमपूर्वा परमोत्कृष्टा सिद्धिः प्रभवति॥ बलिं किंभूतं पंचरकृष्टं मार्जा
रोष्ट्रनरमहिषछागसंबंधिनं पललं लोमसहितम्॥१९॥ सलोमास्थि स्वैरं पललमपि मार्जारमसिते॥ परं चोष्ट्रं मेषं नरमहि
षयोश्छागमपि वा॥ बलिं ते पूजायामपि वितरतां मर्त्यवसतां॥ सतां सिद्धिः सर्वा प्रतिदिनमपूर्वा प्रभवति॥१९॥ टीका॥ पुरश्चरणं

३

३

वशीलक्षमिति ॥ हे मातः वशीसाधकः हविष्याशनरतः सन् दिवा यद् युष्मच्चरणयुगलध्याननिरतो मंत्रं लक्षं प्रजपति एवं नक्तं रात्रौ दिग्वरः नि-नग्नः निधुवनविवादेन रतिक्रीडासक्तेन परं लक्षं मनुं जपेत् सम्यक् विधितः क्षितितले पृथिव्यां स्मरहरसमानः शिवस्वरूप इत्यर्थः ॥२०॥ मूल ॥

वशी लक्षं मंत्रं प्रजपति हविष्याशनरतो ॥ दिवा मातर्युष्मच्चरणयुगलध्याननिरतः ॥ परं नक्तं नग्नो निधुवनविनोदेन च मनुं ॥ जपेल्लक्षं सम्यक् स्मरहरसमानः क्षितितले ॥२०॥ टीका ॥ इदं स्तोत्रमिति ॥ हे मातः स्वरूपाख्यं स्वरूपकथनयोग्यं भवति निशार्धे पूजासमये वा सकलं लक्षीकृत्य यः पठति तस्य प्रलापः कवित्वामृतरसः सन् प्रभवति ॥ इदं स्तोत्रं किंभूतं तव मनुसमुद्धारणजनुः उत्पत्तिस्थानं पुनः किंभूतं पादांबुजयुगलपूजाविधियुतम् ॥२१॥ मूल ॥ इदं स्तोत्रं मातस्तव मनुसमुद्धारणजनुः स्वरूपाख्यं पादांबुजयुगलपू-

जाविधियुतम् ॥ निशार्धे वा पूजासमयमथवा यस्तु पठति प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः ॥२१॥ टीका ॥ कुरंगाक्षीवृंदमिति ॥ कुरंगाक्षीवृंदं स्त्रीसमूहं तव मनुगं कृत्ति पश्चाद् गच्छति ॥ किंभूतं प्रेम्णा कामवासेन चंचलं ॥ एवं क्षोणीपति राजा तस्य वशगो भवति कुवेरप्रतिनिधिः कुबेरसमानः प्रसिद्धो भवति ॥ तस्य रिपुः कारागारं कलयति प्राप्नोति ॥ चलत्केलिकलया सुखेन जीवन्मुक्तो भवति ॥ कथंभूतः स्वयं रतानन्दः रतिक्रीडासक्तः ॥२२॥ इति ॥ मूल ॥ कुरंगाक्षीवृंदं तमनुसरति प्रेमतरलं वश-

स्तस्य क्षोणीपतिरपि कुवेरप्रतिनिधिः ॥ रिपुः कारागारं कलयति चलत्केलिकलया चिरं जीवन्मुक्तः प्रभवति स भक्तः प्रतिजनुः ॥२२॥ इति श्री महाकालविरचितं कालिकास्तोत्रं सम्पूर्णम् ॥ सं० १९३३ कार्तिक प्र० २० शालिग्रामेण लि० ॥

इति महाकालिकायाः कर्पूरस्तोत्रस्य व्याख्या समाप्ता ॥ शुभम् ॥ श्रीः ॥ (शुभम् ॥ श्रीः ॥ श्रीः ॥ लि० ॥

अथ मन्तत्रलेकम्व यातूर सहलं विनदाउदलाई शाखर लहोरि श्रारि प्राहुवेलयं न शारिभ्र न्नलाजर प्रड = ३

शवः
३